वामे मि। मिथ्यादृष्टियोळु गुणकारा नवगुणकारंगळो भत्तप्पुवु। द्वयोः सासादनमिश्ररुगळोळु प्रत्येकं गुणकारंगळु षट् आरप्पुवु। द्वयोः गुणकारा द्वादश असंयतदेशसंयतरुगळोळु द्वादशगुणकारंगळप्पुवु। द्वयोः प्रमत्ताप्रमत्तरुगळोळु गुणकारभंगंगळु त्रिंशत् प्रत्येकं मूवत्तप्पुवु। त्रिषु अपूर्व्वकरणानिवृत्तिकरणसूक्ष्मसांपरायरुगळोळु विंशतिः प्रत्येकं विंशतिगळप्पुवु। क्षीणकषाये क्षीणकषायनोळु गुणकारंगळु विंशतिः विंशतिगळप्पुवु। द्वयोरपि सयोगायोगिगुणस्थानंगळोळु गुणकारंगळु प्रत्येकं चतुष्कं च नाल्कप्पुवु।

पुणरवि देसोत्ति गुणो तिदुणभछच्छक्कयं पुणो खेवा।
पुव्वपदेसडपंचयमेगारमुगतीसमुगुवीसं ॥८३८॥

पुनरपि देशसंयतपर्य्यंतं गुणास्त्रिद्विनभः षट्षट्कं पुनः क्षेपाः पूर्व्वपदेष्वष्ट पंचक एकादशैकान्नत्रिंशदेकान्नविंशतिः ॥

पुनरपि मत्तं गुणकारंगळु मिथ्यादृष्ट्यादि देशसंयतपर्य्यंतं त्रि द्वि नभः षट्षट्कंगळप्पुवु। पुनः क्षेपाः मत्ते क्षेपंगळु पूर्व्वपदेषु पूर्व्वोक्तस्थानेषु इत्यादिस्थानकंगळोळु क्रमदिंद मिथ्यादृष्टियोळेंटुं सासादनमिश्ररुगळोळैदप्पुवु। असंयतदेशसंयतरुगळोळु प्रत्येकं पन्नोंदप्पुवु। प्रमत्ताप्रमत्तरुगळोळु प्रत्येकमेकान्नत्रिंशत्प्रमितंगळप्पुवु। अपूर्व्वानिवृत्तिसूक्ष्मसांपरायरुगळोळु एकान्नविंशतियप्पुवु। क्षीणकषायादिगळोळु क्षेपमं पेळ्दपरु :—

उगुवीसतियं तत्तो तिदुणभछच्छक्कयं च देसोत्ति।
चउसुवसमगेसु गुणा तालं रूऊणया खेवा ॥८३९॥

एकान्नविंशतिः त्रयं ततस्त्रिद्विनभःषट् षट्कं च। देशसंयतपर्य्यंतं चतुर्षूपशमकेषु गुणाः चत्वारिंशद्रूपोनकाः क्षेपाः ॥

तद्गुणकाराः क्रमेण मिथ्यादृष्टौ नव सासादनादिद्वये षट्। असंयतादिद्वये द्वादश। प्रमत्तादिद्वये त्रिंशत्। अपूर्वादित्रये क्षीणकषाये च विंशतिः। सयोगायोगयोश्चत्वारः ॥८३७॥

पुनरप्यादेशसंयतांतं क्रमेण त्रयः द्वौ नभः षट् षट्। पुनः क्षेपाः पूर्वोक्तपदेषु मिथ्यादृष्टौ। सासादनमिश्रयोः पंच। असंयतादिद्वये एकादश। प्रमत्तादिद्वये एकान्नत्रिंशत्। अपूर्वकरणादित्रये एकान्नविंशतिः ॥८३८॥

उन गुण्योंके गुणकार क्रमसे मिथ्यादृष्टिमें नौ, सासादन आदि दोमें छह, असंयत आदि दोमें बारह, प्रमत्त आदि दोमें तीस, अपूर्वकरण आदि तीनमें तथा क्षीण कषायमें बीस, सयोगी और अयोगीमें चार हैं ॥८३७॥

पुनः चक्षुदर्शन रहित और क्षायिक सम्यक्त्वकी अपेक्षा देशसंयत पर्यन्त गुणकार क्रमसे तीन, दो, शून्य, छह, छह जानना। पुनः गुण्यको गुणकारसे गुणा करके जो प्रमाण आवे उसमें मिलाये जानेवाले क्षेप पूर्वोक्त स्थानोंमें-से मिथ्यादृष्टिमें आठ, सासादन और मिश्रमें पाँच, असंयत आदि दोमें ग्यारह, प्रमत्त आदि दोमें उनतीस और अपूर्वकरण आदि तीनमें उन्नीस हैं ॥८३८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षीणकषायनोळ् एकान्नविंशतिक्षेपंगळप्पुवु । सयोगायोगिकेवलिगळोळु त्रयः क्षेपंगळु मूरु मूरप्पुवु । ततः मत्ते मिथ्यादृष्टचादिदेशसंयतपर्य्यंतं क्रमदिदं क्षेपंगळु त्रि द्वि नभः षट् षट्कंगळप्पुवु । नाल्कुमुपशमकगुणस्थानंगळोळु गुणकारंगळु प्रत्येकं चत्वारिंशत्प्रमितंगळु एकोनचत्वारिंशत्क्षेपंगळप्पुवु ।

अनंतरमुक्तगुण्यगुणकारंगळं गुणि सिक्षेपंगळं कूडिकोंड मिथ्यादृष्टचादि गुणस्थानंगळोळ् भावस्थानभंगसमुच्चयसंख्येयं पेळ्दपरु ।

मिच्छादिठाणभंगा अट्ठारसया हवंति तेसीदा ।
बारसया पणुवण्णा सहस्ससहिया हु पणसीदा ॥ ८४०॥

मिथ्यादृष्टचादिस्थानभंगाः अष्टादशशतं च भवंति त्र्यशीतिः । द्वादशशतं पंचपंचाशत् सहस्रसहिताः खलु पंचाशीतिः ॥

मिथ्यादृष्टियोळु उत्तरस्थानभंगंगळु सासिरदेंटु नूरेंभत्तमूरप्पुवु । १८८३ । सासादनंगे सासिरदिन्नूरप्पत्तय्दप्पुवु । १२५५ । मिश्रंगे सासिरदेंभत्तय्दप्पुवु । १०८५ ।

असंयतादिगळोळु पेळ्दपरु :—

रूवहियडवीससया सगणउदा दससया णवेणहिया ।
एक्कारसया दोण्हं खवगेसु जहाकमं वोच्छं ॥८४१॥

रूपाधिकाष्टाविंशतिशतानि सप्तनवतिर्दशशतं नवभिरधिकमेकादशशतं द्वयोः क्षपकेषु यथाक्रमं वक्ष्यामि ॥

असंयतसम्यग्दृष्टियोळु येरडु सासिरदेंटुनूरोंदु स्थानभंगंगळप्पुवु । २८०१ ॥ देशसंयतंगे सासिरद तोंभत्तेळु स्थानभंगंगळप्पुवु । १०९७ ॥ द्वयोः प्रमत्ताप्रमत्तसंयतरुगळोळं प्रत्येकं सासिरदनूरोंभत्तु स्थानभंगंगळप्पुवु । प्र ११०९ । अप्र ११०२ ।

क्षीणकषाये एकान्नविंशतिः । सयोगायोगयोः त्रयः । पुनः आ देशसंयतान्तं पुनस्त्रयः द्वौ नभ षट् षट् चतुर्षूपशामकेषु प्रत्येकं गुणकाराः चत्वारिंशत् । क्षेपा एकोनचत्वारिंशत् ॥८३९॥

प्राग्गुणगुण्यगुणकारान् गुणयित्वा क्षेपेषु निक्षिप्तेषु उत्तरभावस्थानभंगा मिथ्यादृष्टौ त्र्यशीत्यग्राष्टादशशतानि । सासादने पंचपंचाशदग्रद्वादशशतानि । मिश्रे पंचाशीत्यग्रदशशतानि ॥८४०॥

असंयते एकाग्राष्टाविंशतिशतानि । देशसंयते सप्तनवत्यग्रदशशतानि । प्रमत्तादिद्वये नवाग्रैकादशशतानि ।

क्षीण कषायमें उन्नीस, सयोगी अयोगीमें तीन हैं । पुनः चक्षुदर्शनरहित और क्षायिक सम्यक्त्वकी अपेक्षा देशसंयत पर्यन्त तीन, दो, शून्य, छह, छह क्षेप हैं । उपशम श्रेणीके चार गुणस्थानोंमें-से प्रत्येकमें गुणकार चालीस तथा क्षेप उनतालीस हैं ॥८३९॥

पूर्वोक्त गुण्योंको गुणकारोंसे गुणा करके उनमें क्षेप मिलानेपर उत्तर भावोंके स्थानोंके भंग मिथ्यादृष्टीमें अठारह सौ तिरासी, सासादनमें बारह सौ पचपन तथा मिश्रमें एक हजार पच्चासी होते हैं ॥८४०॥

असंयतमें अठाईस सौ एक, देश संयतमें दस सौ सत्तानबे, प्रमत्त आदि दो में ग्यारह

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षपकरोळु यथाक्रमदिदं पेळ्दपेंदु पेळ्दपरु :—

पुव्वे पंचणियट्टी सुहुमे खीणे दहाण छव्वीसा ।
तत्तियमेत्ता दस अड छच्चदुचदु चदुय एगूणं ॥८४२॥

पूर्व्वे पंचानिवृत्तिषु सूक्ष्मे क्षीणकषाये दशानां षड्विंशतिः । तावन्मात्रं दशाष्टषट्चतुश्चतुश्चतुश्चैकोनं ॥

पूर्व्वे द्वितीयानिवृत्तिकरणापेक्षयिदं पूर्व्वमप्पपूर्व्वकरणगुणस्थानदोळु क्षपकापूर्व्वकारणनोळु दशानां षड्विंशतिः इन्नूररुवत्तु एकोनं वो दु गुंदुगुं । २५९ ॥ पंचानिवृत्तिषु अनिवृत्तिकरणगुणस्थानदोळु क्षपकानिवृत्तिकरणपंचभागंगळोळु प्रथमभागानिवृत्तिकरणनोळु तावन्मात्रमेकोनं दशषड्विंशतियोळो दुगुंदिदनितेयक्कुं । २५९ ॥ द्वितीयभागानिवृत्तिकरणक्षपकनोळु दशदशैकोनं दशप्रमितदशंगळोळो दुकुंदुगुं । ९९ ॥ तृतीयभागानिवृत्तिक्षपकनोळु दशाष्टैकोनं दशप्रमिताष्टकदोळो दुगुंदुगुं । ७९ ॥ चतुर्त्थभागानिवृत्तिकरणक्षपकनोळु दशषडेकोनं दशप्रमितषट्कंगळोळो दुगुंदुगु । ५९ ॥ पंचमभागानिवृत्तिकरणक्षपकनोळ दशचतुरेकोनं दशप्रमितचतुष्कदोळो दुगुंदुगुं । ३९ ॥ सूक्ष्मसांपरायक्षपकनोळु दशचतुरेकोनं दशप्रमितचतुष्कमेकोनमक्कुं । ३९ । क्षीणकषायनोळु दशचतुश्चैकोनं दशप्रमितचतुष्कमो दुगुंदुगुं । ३९ ॥

उवसामगेसु दुगुणं रूवहियं होदि सत्त जोगिम्मि ।
सत्तेव अजोगिम्मि य सिद्धे तिण्णेव भंगा हु ॥८४३॥

उपशमकेषु द्विगुणं रूपाधिकं भवति सप्तयोगिनि । सप्तैवायोगिनि च सिद्धे त्रीण्येवं भंगाः खलु ॥

उपशमकापूर्व्वकरणादि नाल्कुं गुणस्थानंगळोळु क्षपकापूर्व्वादिचतुर्ग्गुणस्थानदोळु पेळ्द भंगंगळं द्विगुणिसि लब्धदोळेकरूपं कूडिदोडुपशमकरुगळु नाल्वग्गं स्थानभंगंगळप्पुवु । अल्लि अपूर्व्वकरणोपशमकंगे अपूर्व्वकरणक्षपकन भंग २५९ । मिव द्विगुणिसि २५९ । २ लब्धदोळेकरूपं

क्षपकेषु यथाक्रमं वक्ष्ये ॥८४१॥

अपूर्वकरणे अनिवृत्तिकरणपंचभागेषु सूक्ष्मसाम्पराये क्षीणकषाये चेत्यष्टसु क्षपकेषु भंगाः क्रमेण दशगुणा षड्विंशतिरेकोना २५९ । पुनश्च तावन्तः २५९ । दशगुणा दशैकोनाः ९९ । दशगुणा अष्टावेकोनाः ७९ । दशगुणा षडेकोनाः ५९ । दशगुणाश्चत्वार एकोनाः । ३९ । दशगुणाश्चत्वार एकोनाः ३९ दशगुणाश्चत्वार एकोनाः ३९ भवन्ति ॥८४२॥

उपशामकेषु चतुर्षु खलु तदेव क्षपकचतुष्कोक्तं भंगप्रमाणं द्विगुणं रूपाधिकं स्यात् । सयोगे सप्त ।

सौ नौ होते हैं । क्षपक श्रेणीमें क्रमसे कहते हैं ॥८४१॥

अपूर्वकरण, अनिवृत्तिकरणके पाँच भाग, सूक्ष्म साम्पराय, और क्षीण कषाय इन आठ क्षपकोंमें भंग क्रमसे दो सौ उनसठ, दो सौ उनसठ, निन्यानवे, उन्यासी, उनसठ, उनतालीस, उनतालीस उनतालीस होते हैं ॥८४२॥

उपशम श्रेणीके चार गुणस्थानोंमें, क्षपक श्रेणीके चार गुणस्थानोंमें जितने भंग कहे हैं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कूडिदोडे ५१९। इउ अपूर्व्वकरणोपशमकंगे भंगंगळप्पुवु। अहंगे अनिवृत्तिकरणोपशमकंगे ५१९। १९९। १५९। ११९। ७९॥ सूक्ष्मसांपरायोपशमकंगे भंगंगळेप्पत्तोंभत्तु ७९। उपशान्तकषायंगे भंगंगलेप्पत्तांभत्तु ७९॥ सप्तयोगिनि सयोगकेवलिभट्टारकंगे भंगंगळु ७। सप्तैवायोगिनि च अयोग-केवलियोळु स्थानभंग ७। सिद्धे सिद्धरोळु त्रीण्येव भंगाः खलु मूरे भंगंगळप्पुवु। इंतुक्तगुणंगळ्गं गुणकारंगळ्गं क्षेपंगळ्गं मिथ्यादृष्टिगुणस्थानमादियागि सर्व्वगुणस्थानंगळोळु पृथक्पृथग्रूपदिदं समुच्चयं संदृष्टि वृत्तिकारनिं तोरल्पडुगुं :—

०	मि	च. रहि	सासा.	च. रहि	मिश्र	असं	क्षाइ	देश	क्षाइ
गण्य	२०४	१२	२०४	१२	१८०	१८०	१०४	७२	३६
गुणकारा	९	३	६	२	६	१२	६	१२	६
क्षेप	८	३	५	२	५	११	६	११	६
भंग	१८	८३	१२	५५	१०८५	२८०	१	१०	९७

प्रम	अप्रम	अपूर्व	उपश	अनिवृ	क्षपकंगे —			
३६	३६	१२	१२	१२	४	३	२	१
३०	३०	२०	४०	२०	२०	२०	२०	२०
२९	२९	१९	३९	१९	१९	१९	१९	१९
११०९	११०९	२५९	५१९	२५९	९९	७९	५९	३९

अनिवृत्तिकरणोपशमकंगे					सूक्ष्म	उप.	क्षी	सयो	अयो	सिद्ध
१२	४	३	२	१	१	१	१	१	१	०
४०	४०	४०	४०	४०	२०	४०	४०	२०	४	४	०
३९	३९	३९	३९	३९	१९	३९	३९	१९	३	३	३
५१९	१९९	१५९	११९	७९	३९	७९	७९	३९	७	७	३

यितुत्तरभावस्थानगतभंगंगळं पेळ्दनंतरं पदगतभंगंगळं पेळ्दपरु :—

दुविहा पुण पदभंगा जादिगपदसव्वपदभवात्ति हवे।
जातिपदखयिगमिस्से पिंडेव य होदि सगजोगो ॥८४४॥

द्विविधाः पुनः पदभंगा जातिगपदसर्व्वपदभवा इति भवेत्। जातिपदक्षायिकमिश्रे पिंडे एव च भवति स्वसंयोगः ॥

अयोगेऽपि सप्त। सिद्धे त्रय एव ॥८४३॥

उनके दूनेसे एक अधिक भंग होते हैं। सयोगीमें सात, अयोगीमें सात और सिद्धोंमें तीन ही भंग होते हैं ॥८४३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः मत्ते पदभंगाः पदभंगंगळु द्विविधाः द्विविधंगळक्कुं। एंतेदोडे जातिपदभंगंगळेंदुं सर्व्वपदभवभंगंगळुमेंदितल्लि जातिपदंगळप्प क्षायिकभावदोळं मिश्रभावदोळं पिंडपदभावंगळोळु स्वसंयोगो भवति स्वसंयोगमक्कुं ॥

अयदुवसमगचउक्के एक्कं दो उवसमस्स जातिपदो ।
खइयपदं तत्थेक्कं खवगे जिणसिद्धगेसु दुपणचदू ॥८४५॥

असंयतोपशमक चतुष्के एकं द्वे उपशमस्य जातिपदानि । क्षायिकपदं तत्रैकं क्षपके जिनसिद्धेषु द्विपंचचत्वारि ॥

असंयतादिचतुष्कदल्लियुमुपशमकचतुष्कदोळु मुपशमद जातिपदंगळु क्रमदिंदं असंयत चतुष्कदोळुपशमसम्यक्त्वजातिपदमेकमक्कु—। मुपशमकरोळुपशमसम्यक्त्वमुमुपशमचारित्रमुमेंबेरडुं जातिपदंगळक्कुं। तत्र आ अ संयतादिचतुष्कदोळ मुपसमक चतुष्कदोळं क्षायिक जातिपदमों दे क्षायिकसम्यक्त्वमक्कुं। क्षपकचतुष्कदोळं सयोगायोगिजिनरोळं सिद्धरोळं यथाक्रमदिदं क्षायिकजातिपदमेरडुं अम्बुं नाल्कुमप्पुवु ॥

पुनः अनन्तरं पदभंगा उच्यन्ते ते च जातिपदभंगाः सर्वपदभंगाश्चेति द्विविधाः । तत्र जातिपदरूपक्षायिकभावमिश्रभावपिंडपदभावेषु स्वसंयोगो भवति ॥८४४॥

उपशमस्य जातिपदान्यसंयतादिचतुष्के उपशमसम्यक्त्वमित्येकं । उपशमचतुष्के उपशमसम्यक्त्वचारित्रे द्वे । क्षायिकजातिपदानि तदुभयचतुष्के क्षायिकसम्यक्त्वं । क्षपकचतुष्के द्वे । सयोगायोगयोः पंच । सिद्धे चत्वारि ॥८४५॥

इस प्रकार स्थान भंगको कहकर पदभंग कहते हैं—पद भंगके दो भेद हैं—जातिपद भंग और सर्वपद भंग। जहाँ एक जातिका ग्रहण करके जो भंग किये जाते हैं उन्हें जातिपद भंग कहते हैं। जैसे मिश्र भावमें ज्ञानके चार भेद होते हुए भी एक ज्ञान जातिका ग्रहण करना। और जो जुदे-जुदे सब भावोंको ग्रहण करके भंग किये जायें उन्हें सर्वपद भंग जानना। उनमें जातिपद रूप क्षायिकभाव और मिश्रभावमें पिण्डपद रूप जो भाव हैं उनमें स्वसंयोगी भंग भी होते हैं। जैसे क्षायिक भावमें लब्धिके पाँच भेद हैं अतः लब्धि पिण्डपदरूप है। मिश्रभावमें ज्ञान अज्ञान दर्शन लब्धि पिण्डपदरूप हैं। सो इनमें जहाँ एक भेद होते अन्य भेद भी पाया जाता है जैसे दान होते लाभ पाया जाता है वहाँ स्वसंयोगी भी भंग होते हैं ॥८४४॥

औपशमिक भावका जातिपद असंयत आदि चारमें सम्यक्त्वरूप एक ही है। उपशम श्रेणीके चार गुणस्थानोंमें सम्यक्त्व और चारित्र दो जातिपद हैं। क्षायिक भावके जातिपद असंयत आदि चारमें क्षायिक सम्यक्त्व रूप एक है। क्षपक श्रेणीके चार गुणस्थानोंमें सम्यक्त्व और चारित्र दो जातिपद हैं। सयोग और अयोगीमें सम्यक्त्व, ज्ञान, दर्शन, चारित्र, लब्धि ये पाँच हैं। सिद्धोंमें चारित्रके बिना चार हैं ॥८४५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिच्छतिए मिस्सपदा तिण्णि य अयदम्मि होंति चत्तारि ।
देसतिये पंचपदा तत्तो खीणोत्ति तिण्णि पदा ॥८४६॥

मिथ्यादृष्टित्रये मिश्रपदानि त्रीणि च असंयते भवंति चत्वारि । देशसंयतत्रये पंचपदानि ततः क्षीणकषायपर्य्यंतं त्रीणि पदानि ॥

मिथ्यादृष्टिसासादनमिश्रगळोळु प्रत्येकं मिश्रपदंगळु मूरुमूरप्पुवु । असंयतसम्यग्दृष्टियोळु नाल्कु मिश्रपदंगळप्पुवु । देशसंयतादि त्रयदोळु पंच पंच मिश्र पदंगळप्पुवु । अल्लिंद मेले क्षीणकषायपर्य्यंतं प्रत्येकं मूरुं मूरु मिश्रपदंगळप्पुवु ॥

मिच्छे अट्ठुदयपदा तो तिसु सत्तेव तो सवेदोत्ति ।
छस्सुहुमोत्ति य पणगं खीणोत्ति जिणेसु चदुतिदुगं ॥८४७॥

मिथ्यादृष्टावष्टोदयपदानि ततस्त्रिषु सप्तैव ततः सवेदपर्य्यंतं षट् सूक्ष्मसांपरायपर्य्यंतं पंचकं क्षीणकषाय पर्य्यंतं जिनयोश्चतुस्त्रिद्वयं ॥

मिथ्यादृष्टियोळौदयिकपदंगळेंटप्पुवु । सासादनादित्रयदोळु प्रत्येकं सप्तपदंगळप्पुवु । मेले देशसंयतादि सवेदानिवृत्तिपर्य्यंतं प्रत्येकं षट्पदंगळप्पुवु । सूक्ष्मसांपरायपर्य्यंतं पंचपंचपदंगळप्पुवु । क्षीणकषायपर्य्यंतं सयोगरोळमयोगरोळं क्रमदिंदं नाल्कुं मूरुमेरडुमप्पुवु ॥

मिच्छे परिणामपदा दोण्णि य सेसेसु होदि एक्कं तु ।
जातिपदं पडि वोच्छं मिच्छादिसु भंगपिंडं तु ॥८४८॥

मिथ्यादृष्टौ परिणामपदे द्वे च शेषेषु भवत्येकं तु । जातिपदं प्रति वक्ष्यामि मिथ्यादृष्ट्यादिषु भंगपिंडं तु ॥

मिश्रपदानि मिथ्यादृष्ट्यादित्रये त्रीणि । असंयते चत्वारि । देशसंयतादित्रये पंच । तत उपरि क्षीणकषायान्तं त्रीणि ॥८४६॥

औदयिकपदानि मिथ्यादृष्टावष्टौ । सासादनादित्रये सप्त । उपरि सवेदानिवृत्त्यन्तं षट् । सूक्ष्मसाम्परायान्तं पंच । क्षीणकषायान्तं चत्वारि । सयोगे त्रीणि । अयोगे द्वे ॥८४७॥

मिश्रभावके जातिपद मिथ्यादृष्टि और सासादनमें अज्ञान, दर्शन, लब्धि ये तीन हैं। और मिश्र गुणस्थानमें ज्ञान, दर्शन, लब्धि ये तीन हैं। असंयतमें ज्ञान, दर्शन, लब्धि, सम्यक्त्व ये चार हैं। देशसंयत आदि तीनमें ज्ञान, दर्शन, लब्धि, सम्यक्त्व इन चारोंके साथ देशसंयतमें देशसंयम और प्रमत्त अप्रमत्तमें सरागसंयम होनेसे पाँच हैं। उससे ऊपर क्षीणकषायपर्यन्त ज्ञान, दर्शन, लब्धि तीन जातिपद हैं ॥८४६॥

औदयिकभावके जातिपद मिथ्यादृष्टिमें आठ हैं—गति, कषाय, लिंग, लेश्या, मिथ्यात्व, अज्ञान, असंयम और असिद्धत्व। सासादन आदिमें मिथ्यात्वके बिना सात हैं। ऊपर अनिवृत्तिकरणके सवेद भागपर्यन्त असंयमके बिना छह हैं। उससे ऊपर सूक्ष्मसाम्परायपर्यन्त वेदके बिना पाँच हैं। उससे ऊपर क्षीणकषायपर्यन्त कषायके बिना चार हैं। सयोगीमें अज्ञानके बिना तीन हैं तथा अयोगीमें लेश्या बिना दो हैं ॥८४७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिथ्यादृष्टियोळु परिणामपदंगळेरडप्पुवु। तु मत्ते शेषगुणस्थानदोळं गुणस्थानातीत सिद्धपरमेष्ठिगळोळ मेकपदमेयक्कुं। संदृष्टि :—

०	मि	सा	मिश्र	अ	दे	प्र	अप्र	अपु उ	क्ष	अनि	क्ष	सू	क्ष	उ	क्षी	स	अ	सि
उप	०	०	०	१	१	१	१	२	०	२	०	२	२	२	०	०	०	०
क्षायि	०	०	०	१	१	१	१	१	२	१	२	१	०	१	२	५	५	४
मिश्र	३	३	३	४	५	५	५	३	३	३	३	३	३	३	३	०	०	०
औद	८	७	७	७	६	६	६	६	६	६	६	५	५	४	४	३	२	०
पारि	२	१	१	१	१	१	१	१	१	१	१	१	१	१	१	१	१	१

तु मत्ते अनंतरं जातिपदं प्रति मिथ्यादृष्ट्यादि गुणस्थानंगळोळु भंगपिंडमं पेळ्दपेनें तु पेळ्दपन दें तें दोडे—

उपशम		क्षाइक भावंगळु					क्षायोपशमिक भावंगळ						
सं	चा	सं	चा	णा	दं	ल	५	णा ४	अ ३	द ३	ल ५	वे १	चा १	दे १

औदयिक भावंगळु									पारिणामिक		
ग ४	क ४	लि ३	मि १	अ १	अ १	अ १	अ १	ले ६	भ १	अ १	जी १

इंतु जातिपदंगळु उपशमदोळेरडु २। क्षायिकजातिपदंगळु ५। क्षायोपशमिक जातिपदंगळ ७। औदयिक जातिपदंगळु ८। पारिणामिक जातिपदंगळु मूरु ३। ई सामान्यपदंगळोळु मिथ्या-

---

परिणामपदानि मिथ्यादृष्टौ द्वे। तु— पुनः शेषगुणस्थानेषु सिद्धे चैकैकं स्यात्। तु पुनः—अनन्तरं जातिपदं प्रति गुणस्थानेषु भंगपिंडं वक्ष्ये तद्यथा—

जातिपदेषु द्वयुपशमकपंचक्षायिकसप्तक्षायोपशमिकाष्टौदयिकत्रिपारिणामिकेषु मिथ्यादृष्टौ

पारिणामिकभावके जातिपद मिथ्यादृष्टिमें भव्य-अभव्यरूप दो हैं। शेष गुणस्थानोंमें भव्यरूप एक ही है। सिद्धोंमें जीवत्वरूप एक ही है।

आगे जातिपदकी अपेक्षा गुणस्थानोंमें भंगोंका समुदाय कहते हैं—जातिपद दो औपशमिकके, पाँच क्षायिकके, सात क्षायोपशमिकके, आठ औदयिकके और तीन पारिणामिकके हैं। उनमें-से औदयिकके जितने जातिपद होते हैं उतने तो गुण्य जानना। उनके गुणकार और क्षेप कहनेके लिए प्रत्येक भंगादि करनेमें मिश्रादिके जितने जातिपद हों उतने भेद ग्रहण करना। किन्तु औदयिकका जातिपदका समूहरूप एक ही भेद ग्रहण करना। ऐसा करके प्रत्येक भंगमें औदयिकका भेद तो गुणकार रूप जानना तथा अन्य भावोंके भेद क्षेपरूप जानना। तथा दो संयोगी आदि भंगोंमें औदयिकका भेद और अन्य भावोंके भेद सहित जो भंग हों उन्हें गुणकार जानना। तथा औदयिक बिना अन्य

१.

उपशमभा		क्षायिकभाव					क्षायोपशमिकभाव						
सं	चा	सं	चा	णा	दं	ल ५	णा ४	अ ३	द ३	ल ५	वे १	चा १	दे १

औदयिकभाव									पारिणामिकभाव		
ग ४	क ४	लि ३	मि १	अ १	अ १	अ १	अ १	ले ६	भ १	अ १	जी १

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृष्टि

मिश्र			औ	पारि	
अ	दं	ल	८	भ	अ

यिल्लि औदयिक भावंगळे दु जातिपवंगळु गुण्यंगळप्पुवु। गुण्य ८। प्र १। क्षे ५। द्वि गु ५। क्षे ६। त्रि गु ६। स्वसंयोगक्षेपंगळु ३। इल्लि स्वसंयोगमे ते-बोडे जातिपदत्वविदं अज्ञानदोळं दर्शनदोळं लब्धिगळोळं संभविसुतुमे दरिउदु कूडि मिथ्यादृष्टिगे गुण्य ८। गु १२। क्षे १४। ई गुण्यगुणकारंगळं गुणिसि क्षेपंगळं कूडिद लब्धभंगंगळु ११०।

सासादनंगे

मिश्र			औदइ	पारि	
अ	द	ल	७	भ	

इल्लि गुण्यंगळु ७। प्र गु १ क्षे ४। द्वि गु ४। क्षे ३। त्रि सं गु ३। स्व सं क्षे ३ कूडि सासादनंगे गुण्य ७। गु ८। क्षे १०। लब्ध भंग ६६। मिश्रंगे

मिश्र			औ	पारि	
अ	दं	ल	८	भ	अ

औदयिकान्यष्टौ गुण्यं ८। प्रगु १ क्षे ५। द्विगु ५ क्षे ६। त्रिगु ६। स्वसंयोगक्षेपाः कुज्ञानान्तरं दर्शने दर्शनान्तरं लब्धौ लब्ध्यन्तरमिति त्रयः ३। मिलित्वा गुण्यं ८ गु १२ क्षे १४ गुण्यगुणकारान् संगुण्य क्षेपेषु निक्षिप्तेषु लब्धभंगाः ११०।

सासादने

मिश्र			औ	पारि	
अ	दं	ल	७	भ	

गुण्यं ७ प्रगु १ क्षे ४। द्विगु ४ क्षे ३। त्रिगु ३ स्वसंक्षे ३ मिलित्वा गुण्यं ७। गु ८ क्षेप १० भंगाः ६६।

भावोंके संयोगसे जो दो संयोगी आदि भंग हों उन्हें क्षेपरूप जानना। तथा क्षायिक या मिश्रके एक जातिपदके भेदमें उसीके अन्य भेद जहाँ सम्भव हों वहाँ स्वसंयोगी भंग होते हैं उन्हें क्षेपरूप जानना। इस प्रकार गुण्यको गुणकारसे गुणा करके क्षेपको जोड़नेपर जितने हों, उतने भंग जानना।

सो मिथ्यादृष्टिमें मिश्रके अज्ञान, दर्शन, लब्धि ये तीन, औदयिकके आठ और पारिणामिकके भव्य-अभव्यरूप दो जातिपद हैं। उनमें-से औदयिकके आठ तो गुण्य जानना। प्रत्येक भंगमें औदयिकका आठका समूहरूप एक तो गुणकार जानना, और तीन मिश्रके, दो पारिणामिकके ये पाँच क्षेप जानना। दो संयोगीमें औदयिकके आठका समूहरूप एकका योग लिये तीन मिश्रके और दो पारिणामिकके ये पाँच तो गुणकार जानना। तथा तीन मिश्रके संयोग सहित दो पारिणामिकके भेदरूप छह दोसंयोगी क्षेप जानना। तीन संयोगी-में औदयिकके आठका समूहरूप एक और अभव्य पारिणामिकके इन दोनोंके साथ तीन मिश्रको मिलानेसे हुए छह भंग गुणकाररूप जानना। स्वसंयोगीमें एक अज्ञान होते दूसरा अज्ञान पाया जाता है जैसे कुमतिके साथ कुश्रुत आदि होते हैं। इसी तरह एक दर्शन होते अन्य दर्शन पाये जाते हैं। जैसे चक्षुदर्शन होते अन्य दर्शन होते हैं। इसी तरह एक लब्धि होते अन्य लब्धि होती है जैसे दान होते लाभादि होते हैं। ये तीन भंग क्षेप जानना। सब मिलकर गुण्य आठ, गुणकार बारह, क्षेप चौदह होते हैं। गुण्यको गुणकारसे गुणा करके क्षेपको जोड़नेपर एक सौ दस भंग होते हैं।

इसी प्रकार सासादनमें मिश्रभावके अज्ञान, दर्शन, लब्धि ये तीन, औदयिकके सात, पारिणामिकका भव्यत्वरूप एक जातिपद है। उसमें गुण्य सात हैं। तथा प्रत्येक भंगमें गुणकार एक, क्षेप चार हैं। दो संयोगी भंगमें गुणकार चार क्षेप तीन हैं। तीन संयोगीमें

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिश्र			औदयि	पारिणा
णा	द	ल	७	भ

इल्लि गुण्य ७। प्र गु १। क्षे ४। द्वि गु ४। क्षे ३। त्रि गु ३। स्वसं क्षे ३। कूडि गुण्य ७। गु ८। क्षे १०। लब्ध भंग ६६॥ असंयतंगे

उपश	क्षायि	मिश्र				औ	पारि
सं १	सं १	ण	द	अ	ल	७	भ १

इल्लि गुण्य ७। प्र गु १। क्षे ७। द्वि गु ७। क्षे १२। त्रि गु १२। क्षे ६। चतु गु ६। स्वसंक्षे ३। कूडि असंयतंगे गुण्य ७। गु २६। क्षे २८। लब्धभंगंगळु असंयतंगे २१०॥ देशसंयतंगे

उ	क्षा	मि				औ	पा
सं	सं	णा	द	ल	वे	चा	६	भ

यिल्लिगुण्यंगळु ६। प्र गु १। क्षे ८। द्वि गु ८। क्षे १५। त्रि गु १५। क्षे ८। च गु ८। स्वसं

मिश्रे

मिश्र			औ	पारि
णा	दं	ल	७	भ

गुण्यं ७ प्रगु १ क्षे ४। द्विगु ४ क्षे ३। त्रिगु ३ स्वसंक्षे ३ मिलित्वा गुण्यं ७ गु ८। क्षे १० भंगाः ६६।

असंयते

ब	उप	क्षा	मिश्र			औ	पा
सं १	सं १	सं १	णा	दं	ल	७	भ

गुण्यं ७ प्रगु १ क्षे ७। द्विगु ७ क्षे १२। त्रिगु १२ क्षे ६ चगु ६ स्वसंक्षे ३ मिलित्वा गुण्यं ७ गु २६ क्षे २८ भंगाः २१०।

देशसंयतादित्रये प्रत्येकं

उप	क्षा	मिश्र				औ	पा
सं	सं	णा	दं	ल	वे चा	६	भ

गुण्यं ६ प्रगु १ क्षे

गुणकार तीन है। स्वसंयोगीमें क्षेप तीन हैं। सब मिलकर गुण्य सात, गुणकार आठ और क्षेप दस होनेसे भंग छियासठ हैं।

मिश्र गुणस्थानमें मिश्रभावके ज्ञान, दर्शन, लब्धि ये तीन, औदयिकके सात, पारिणामिकके भव्यत्वरूप एक जातिपद है। यहाँ गुण्य सात हैं। प्रत्येक भंगमें गुणकार एक क्षेप चार, दो संयोगी भंगमें गुणकार चार क्षेप तीन, तीन संयोगीमें गुणकार तीन, स्वसंयोगीमें क्षेप तीन। सब मिलकर गुण्य सात, गुणकार आठ, क्षेप दस होनेसे भंग छियासठ होते हैं।

असंयतमें औपशमिकका एक सम्यक्त्व, क्षायिकका एक सम्यक्त्व, मिश्रके तीन ज्ञान दर्शन लब्धि, औदयिकके सात, पारिणामिकका भव्यत्वरूप एक जातिपद है। वहां गुण्य सात हैं। प्रत्येक भंगमें गुणकार एक, क्षेप सात, दो संयोगीमें गुणकार सात क्षेप बारह, तीन संयोगीमें गुणकार बारह, क्षेप छह, चार संयोगीमें गुणकार छह। पाँच संयोगीका अभाव है क्योंकि क्षायिक सम्यक्त्व और उपशम सम्यक्त्वका संयोग नहीं होता। स्वसंयोगीमें क्षेप तीन। सब मिलकर गुण्य सात, गुणकार छब्बीस और क्षेप अठाईस होनेसे भंग दो सौ दस होते हैं।

देशसंयत आदि तीनमें औपशमिकका एक सम्यक्त्व, क्षायिकका एक सम्यक्त्व, मिश्रके चार—ज्ञान दर्शन लब्धि वेदक चारित्र, औदयिकके छह, पारिणामिक एक भव्यत्व जातिपद है। यहां गुण्य छह हैं। प्रत्येक भंगमें गुणकार एक क्षेप आठ हैं। दो संयोगीमें

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षे ३। कूडि देशसंयतंगे गुण्य ६। गु ३२। क्षे ३४। लब्ध भंग २२६॥ प्रमत्तसंयतंगेयु मिते गुण्य ६। गु ३२। क्षे ३४। लब्धभंग २२६॥ अप्रमत्तसंयतंगेयुमिते गुण्य ६। गु ३२। क्षे ३४। लब्ध भंग २२६॥ अपूर्व्वकरणोपशमकंगे

उपश	क्षायि	मिश्र	औदइ	पारि
स चा	सं १	णा	दं	ल		६		भ १

यिल्लि उपशमकापूर्व्वकरणंगे गुण्य ६। प्र गु १। क्षे ७। द्वि गु ७। क्षे १६। त्रि गु १६। क्षे १३। च गु १३। क्षे ३। पं गु ३। स्व सं क्षे ३। कूडि अपूर्व्वकरणंगे गुण्य ६। गु ४०। क्षे ४२। लब्ध भंग २८२। सवेदानिवृत्तिकरणोपशमकंगेयुमिते गुण्य ६। गु ४०। क्षे ४२। लब्ध भंग २८२॥ अवेदानिवृत्तिकरणोपशमकंगे

उपश	क्षायि	मिश्र	औद	पारि
सं	चा	सं १	णा	दं	ल	५	भ

इल्लि अ वेदानिवृत्तिगे गुण्य ५। प्र गु १। क्षे ७। द्वि गु ७। क्षे २६। त्रि गु १६। क्षे १३। च गु १३। क्षे ३। पं गु ३। स्वसं क्षे ३। कूडि गुण्य ५। गु ४०। क्षे ४२। लब्धभंग २४२। इल्लि अनिवृत्तिकरणंगे कषाय-

---

८ द्विगु ८ क्षे १५। त्रिगु १५ क्षे ८ चगु ८ स्वसंक्षे ३ मिलित्वा गुण्यं ६ गु ३२ क्षे ३४ भंगाः २२६।

उपशमकेष्वपूर्वसवेदानिवृत्तिकरणयोः

उपश	क्षा	मिश्र	औ	पा
सं। चा	सं १	णा। दं। ल	६	म

गुण्यं ६।

प्रगु १ क्षे ७ द्विगु ७ क्षे १६ त्रिगु १६ क्षे १३ चगु १३ क्षे ३ पंगु ३ स्वसंक्षे ३ मिलित्वा गुण्यं ६ गु ४० क्षे ४२ भंगाः २८२।

अवेदभागसूक्ष्मसाम्परायिकयोः

उपश	क्षा	मिश्र	औ	पा
सं। चा	सं १	णा। दं। ल	५	भ

गुण्यं ५ प्रगु १ क्षे

गुणकार आठ, क्षेप पन्द्रह हैं। तीन संयोगीमें गुणकार पन्द्रह क्षेप आठ हैं। चार संयोगीमें गुणकार आठ हैं। स्वसंयोगीमें क्षेप तीन हैं। सब मिलकर गुण्य छह, गुणकार बत्तीस, क्षेप चौंतीस होनेसे भंग दो सौ छब्बीस हैं।

उपशम श्रेणीमें अपूर्वकरण और वेद सहित अनिवृत्तिकरणमें औपशमिकके दो—सम्यक्त्व और चारित्र, क्षायिकका एक सम्यक्त्व, मिश्रके तीन ज्ञान दर्शन लब्धि, औदयिकके छह और पारिणामिकका एक भव्यत्व ये जातिपद हैं। यहाँ गुण्य छह हैं। प्रत्येक भंगमें गुणकार एक, क्षेप सात हैं। दो संयोगीमें गुणकार सात क्षेप सोलह हैं। तीन संयोगीमें गुणकार सोलह क्षेप तेरह हैं। चार संयोगीमें गुणकार तेरह क्षेप तीन हैं। पाँच औपशमिक संयोगीमें गुणकार तीन हैं। यहाँ क्षायिक सम्यक्त्वके साथ चारित्र होनेसे पाँच संयोगी भी होता है। स्वसंयोगीमें क्षेप तीन हैं। सब मिलकर गुण्य छह, गुणकार चालीस और क्षेप बयालीस होनेसे भंग दो सौ बयासी होते हैं।

वेद रहित अनिवृत्तिकरण और सूक्ष्मसाम्परायमें औपशमिक दो सम्यक्त्व और चारित्र, क्षायिक एक सम्यक्त्व, मिश्र तीन ज्ञान दर्शन लब्धि, औदयिक पाँच, पारिणामिक एक भव्यत्व ये जातिपद हैं। गुण्य पाँच हैं। प्रत्येक भंगमें गुणकार एक क्षेप सात हैं। दो संयोगीमें गुणकार सात क्षेप सोलह हैं। तीन संयोगीमें गुणकार सोलह क्षेप तेरह हैं। चार

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रहितभागे संभविसदेकें दोडे कषाय जातिपदं विवक्षितल्पट्टुदप्पुदरिंदं सूक्ष्मसांपरायोपशमकंगेयुमिते गुण्य ५। गु ४०। क्षे ४२। लब्धभंग २४२॥ उपशांतकषायंगे—

उपश	क्षायि	मिश्र				औदइ		पारि
सं	चा	सं १	णा	दं	ल		४		भ १

यिल्लि गुण्य ४। प्र गु १। क्षे ७।

द्वि गु ७। क्षे १६। त्रि गु १६। क्षे १३। चतु गु १३। क्षे ३। पं गु ३। स्व सं क्षे ३। कूडि उपशांतकषायं गुण्य ४। गु ४०। क्षे ४२। लब्धभंगंगळु २०२॥ क्षपकापूर्व्वकरणंगे

क्षाइ	मिश्र भाव		औद			पारि
सं	चा	णा	दं	ल	६	भ १

यिल्लि अपूर्व्वकरणक्षपकंगे गुण्य ६। प्र गु १।

क्षे ६। द्वि गु ६। क्षे ११। त्रि गु ११। क्षे ६। च गु ६। स्व सं क्षे ३। कूडिअपूर्वकरणक्षपकंगे गुण्य ६। गु २४। क्षे २६। लब्धभंगंगळु १७०। क्षपकानिवृत्तिकरणसवेदभागेयोळुमिते गुण्य ६। गु २४। क्षे २६। लब्ध भंग १७०। वेदरहित भागेयोलुं

क्षायि	मिश्र भावंग	औ	पा
सं	चा	णा	दं	ल	५	भ १

गुण्य ५।

---

७ द्विगु ७ क्षे १६ त्रिगु १६ क्षे १३ चगु १३ क्षे ३ पगु ३ स्वसंक्षे ३ मिलित्वा गुण्यं ५ गु ४० क्षे ४२ भंगाः २४२। नात्राकषायभागः कषायजातिपदस्य विवक्षितत्वात्।

उपशान्तकषाये—

उपश	क्षा	मिश्र				औ	पा
सं	चा	सं १	णा	दं	ल	४	भ १

गुण्यं ४। प्रगु १ क्षे ७

द्विगु ७ क्षे १६ त्रिगु १६ क्षे १३ चगु १३ क्षे ३ पंगु ३ स्वसंक्षे ३ मिलित्वा गुण्यं ४ गु ४० क्षे ४२ भंगाः २०२।

क्षपकेष्वपूर्वसवेदानिवृत्तिकरणयोः

क्षायि	मिश्रभाव		औ	पारि
सं	चा	णा	दं	ल	६	भ १

गुण्यं ६। प्रगु १ क्षे

६ द्विगु ६ क्षे ११ त्रिगु ११ क्षे ६ चगु ६ स्वसंक्षे ३ मिलित्वा गुण्यं ६ गु २४ क्षे २६ लब्धभंगाः १७०।

संयोगीमें गुणकार तेरह क्षेप तीन हैं। पाँच संयोगीमें गुणकार तीन हैं। स्वसंयोगीमें क्षेप तीन हैं। सब मिलकर गुण्य पाँच, गुणकार चालीस, क्षेप बयालीस होनेसे भंग दो सौ बयालीस हैं। यहाँ कषायका जातिपद एक लिया है इससे कषायरहित भागोंके भेद नहीं किये हैं। उपशान्त कषायमें भी सूक्ष्म साम्परायकी तरह जातिपद हैं विशेष इतना है कि औदयिकके जातिपद चार हैं। अतः गुण्य चार होनेसे तथा गुणकार और क्षेप पूर्ववत् होनेसे भंग दो सौ दो होते हैं।

क्षपकश्रेणीमें अपूर्वकरण और वेद सहित अनिवृत्तिकरणमें क्षायिक दो सम्यक्त्व और चारित्र, मिश्र तीन ज्ञान दर्शन लब्धि, औदयिक छह और पारिणामिक एक भव्यत्व ये जातिपद हैं। यहाँ गुण्य छह हैं। प्रत्येक भंगमें गुणकार एक, क्षेप छह, दो संयोगीमें गुणकार छह क्षेप ग्यारह हैं। तीन संयोगीमें गुणकार ग्यारह क्षेप छह हैं। चार संयोगीमें गुणकार छह ह। स्वसंयोगीमें क्षेप तीन हैं। सब मिलकर गुण्य छह, गुणकार चौबीस और क्षेप छब्बीस होनेसे भंग एक सौ सत्तर होते हैं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्र गु १। क्षे ६। द्वि गु ६। क्षे ११। त्रि गु ११। क्षे ६। च गु ६। स्व सं क्षे ३। कूडि गुण्य ५। गु २४। क्षे २६। लब्ध भंग १४६। इल्लियुं क्षपकश्रेणियोळु अनिवृत्तिकरणक्षपकंगे कषायरहित भागे संभविसदु एकेंदोडे जातिपदविवक्षेयप्पुदरिंदं। सूक्ष्मसांपराय क्षपकंगेयुमिते गुण्य ५। गु २४। क्षे २६। लब्ध भंग १४६। इल्लियुं क्षपक श्रेणियोळु अनिवृत्तिकरणक्षपंगे कषायरहित भागे संभविसदु। क्षीणकषायंगे कषायपदरहितमप्पुदरिंदं

क्षायि	मिश्र भाव	औदयि	पारि
सं | चा | णा | दं | ल	४	भ १	

५

यिल्लि गण्य ४। प्र गु १। क्षे ६। द्वि गु ६। क्षे ११। त्रि गु ११। क्षे ६। च ग ६। स्व सं क्षे ३। कूडि गुण्य ४। ग २४। क्षे २६। लब्ध भंग १२२॥

सयोगकेवलिभट्टारकंगे

क्षायिक भावंगळ		औव	पारि
णा | दं | सं | चा | ल		४	भ १

इल्लि गुण्य ३। प्र गु १। क्षे ६। द्वि गु ६। क्षे ५। त्रि गु ५। स्वसंयोगक्षेपं लब्धिगळोळोंदु १ कूडि गुण्य ३। गु १२। क्षे १२। लब्ध भंग ४८॥ अयोगिकेवलिभट्टारकंगे

क्षायिकभावं		औ	पा
णा | दं | सं | चा | ल		२	भ

इल्लि गुण्य २। १०

अवेदभागसूक्ष्मसाम्परायायोः

क्षा	मिश्रभाव	औ	पा
स । चा | णा । दं । ल	५	भ १	

गुण्यं ५। प्रगु १ क्षे ६ द्विगु ६ क्षे ११ त्रिगु ११ क्षे ६ चगु ६ स्वसंक्षे ३ मिलित्वा गुण्यं ५ गु २४ क्षे २६ भंगाः १४६। नास्याप्यकषायभागः।

क्षीणकषाये कषायपदं नेति

क्षायि	मिश्रभाव	औ	पा
स । चा | णा । दं । ल	४	भ १	

गुण्यं ४। प्रगु १ क्षे ६ द्विगु ६ क्षे ११ त्रिगु ११ क्षे ६ चगु ६ स्वसंक्षे ३ मिलित्वा गुण्यं ४ गु २४ क्षे २६ भंगाः १२२। १५

सयोगे

क्षायिकभाव		औ	पा
णा । दं । सं । चा । ल		३	भ

गुण्यं ३ प्रगु १। क्षे ६। द्विगु ६ क्षे ५। त्रिगु ५।

स्वसंयोगक्षेपो लब्धिष्वेकः मिलित्वा गुण्यं ३ गु १२ क्षे १२ भंगाः ४८।

वेदरहित अनिवृत्तिकरण और सूक्ष्म साम्परायमें भी जातिपद अपूर्वकरणकी तरह है। विशेष इतना है कि औदयिकके पाँच जातिपद होनेसे गुण्य पाँच हैं तथा गुणकार चौबीस और क्षेप छब्बीस हैं। अतः भंग एक सौ छियालीस हैं। क्षीण- २०
कषायमें भी जातिपद इसी प्रकार है। किन्तु औदयिकके चार जातिपद होनेसे गुण्य चार हैं। गुणकार चौबीस और क्षेप छब्बीस हैं। अतः भंग एक सौ बाईस हैं। सयोगीमें क्षायिकके पाँच ज्ञान दर्शन सम्यक्त्व चारित्र लब्धि, औदयिकके तीन और पारिणामिकका एक जातिपद है। यहाँ गुण्य तीन हैं। प्रत्येक भंगमें गुणकार एक क्षेप छह हैं। दो संयोगीमें गुणकार छह क्षेप पाँच हैं। तीन संयोगीमें गुणकार पाँच हैं। स्वसंयोगीमें किसी एक क्षायिक २५
लब्धिके साथ अन्य क्षायिक लब्धि पायी जानेसे क्षेप एक है। सब मिलकर गुण्य तीन, गुणकार बारह और क्षेप बारह होनेसे भंग अड़तालीस हैं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्र गु १ । क्षे ६ । द्वि गु ६ । क्षे ५ । त्रि गु ५ । स्वसंक्षे १ । कूडि गुण्य २ । गुण १२ । क्षे १२ । लब्धभंग ३६ । सिद्धपरमेष्ठिगे

क्षायिक भा			
सं	णा	द	ल	जी

इल्लि प्रक्षे ५ । द्विक्षे ४ । कूडि भंगंगळु

९ ॥ यितुक्त गुण्य गुणकारक्षेपभंगमिवर संख्येयं पेळ्दपरः—

अट्ठगुणिज्जा वामे तिसु सग छच्चउसु छक्क पणगं च ।
थूले सुहुमे पणगं दुसु चउ तियदुगुमदो सुण्णं ॥८४९॥

अष्टौ गुण्यं वामे त्रिषु सप्त षट्चतुर्षु षट्कपंचकं च । स्थूले सूक्ष्मे पंचकं द्वयोश्चत्वारि त्रयं द्वयमतः शून्यं ॥

यितु गुण्यंगळु मिथ्यादृष्टियोळ्दुं सासादनमिश्रसंयतरुगळोळ्ळुं देशसंयत प्रमत्तसंयत अप्रमत्तसंयत क्षपकोपशमकापूर्वक :

०	मिथ्या	सासा	मिश्र	असं	देश	प्रम	अप्रम	अपूर्व	उपश
गुण्य	८	७	७	७	६	६	६	६	६
गुणका	१२	८	८	२६	३२	३२	३२	२४	४०
क्षेपग	१४	१०	१०	२८	३४	३४	३४	२६	४२
भंग	११०	६६	६६	२१०	२२६	२२६	२२६	१७०	२८२

अनिवृ	अनि उ	सू प	सू उ	उप क	क्षीण	सयो	अयो	सिद्ध
६।५	६।५	५	५	४	४	३	२	०
२४	४०	२४	४०	४०	२४	१२	१२	०
२६	४२	२६	४२	४२	२६	१२	१२	९
१७०	२८२	१४६	२४२	२०२	१२२	४८	३६	९
१४६	२४२							

अयोगे

क्षायिकभाव					औ	पा
णा	दं	स	चा	ल	२	भ

गुण्यं २ प्रगु १ क्षे ६ द्विगु ६ क्षे ५ त्रिगु ५ स्वसंक्षे १ मिलित्वा गुण्यं २ गु १२ क्षे १२ भंगाः ३६ ।

सिद्धे

क्षायिक				पा
सं	णा	दं	ल	जी

प्र क्षे ५ । द्वि क्षे ४ । मिलित्वा भंगाः ९ ॥८४८॥ उक्तगुण्यादिसंख्या आह—

अयोगीमें भी जातिपद सयोगीकी तरह हैं । किन्तु औदयिकके दो ही जातिपद होनेसे गण्य दो हैं । और गुणकार बारह तथा क्षेप बारह होनेसे भंग छत्तीस हैं ।

सिद्धोंमें क्षायिकके चार—सम्यक्त्व, ज्ञान, दर्शन और तीर्थरूप लब्धि तथा पारिणामिकका एक जीवत्व जातिपद हैं । प्रत्येक भंगमें क्षेप पाँच हैं । दो संयोगीमें क्षेप चार हैं । सब मिलकर नौ भंग होते हैं ॥८४८॥

आगे गुण्य आदिकी संख्या कहते हैं—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रणरुगळोळ् गुण्यंगळारारप्पुवु। अनिवृत्तिकरणक्षपकोपशमकरुगळोळ् प्रत्येकमारुमप्पुं गुण्यंगळप्पुवु। सूक्ष्मसांपरायक्षपकोपशमकरुगळोळ् प्रत्येकं पंचकं गुण्यमक्कुं। उपशांतकषायक्षीणकषायरुगळोळ् प्रत्येकं नाल्कु नाल्कु गुण्यंगळप्पुवु। सयोगरोळ् मूरुगुण्यंगळप्पुवु। अयोगिगळोळे रडु गुण्यंगळप्पुवु। मेले सिद्धरोळ् शून्यमक्कुं॥

बारट्ठट्ठ छव्वीसं तिसु तिसु बत्तीसयं च चउवीसं।
तो तालं चउवीसं गुणगारा बार बार णभं ॥८५०॥ ५

द्वादशाष्टाष्टषट्विंशतयः त्रिषु त्रिषु द्वात्रिंशच्च चतुर्विंशतिः ततश्चत्वारिंशत् चतुर्विंशतिः गुणकाराः द्वादशद्वादशनभः॥

गुणकारंगळु मिथ्यादृष्टियोळ्पन्नेरडुं सासादनमिश्ररुगळोळ्टेंटुं असंयतनोळिप्पत्तारुं देशसंयतादिगुणस्थानत्रयदोळ् प्रत्येकं मूवत्तेरडुगळुं अपूर्वकरणादिक्षपकत्रयदोळ् प्रत्येकं चतुर्विंशतिगळुं अल्लिद मेळे उपशमकचतुष्टयदोळ् प्रत्येकं नाल्वत्तुगळुं क्षीणकषायनोळ् चतुर्विंशतियुं सयोगरोळ् पन्नेरडुमयोगिगळोळ् पत्तेरडुं सिद्धरोळ् शून्यमक्कुं॥ १०

वामे चउदस दुसु दस अडवीसं तिसु हवंति चोत्तीसं।
तिसु छव्वीस दुदालं खेवा छव्वीस बार बारणवं ॥८५१॥

वामे चतुर्दश द्वयोर्दश अष्टाविंशतिः त्रिषु भवंति चतुस्त्रिंशत्। त्रिषु षड्विंशतिर्द्विचत्वारिंशत् क्षेपाः षड्विंशतिर्द्वादश द्वादशनव॥ १५

गुण्यानि मिथ्यादृष्टावष्टौ। सासादनादित्रये सप्त। देशसंयतादित्रये क्षपकोपशमकापूर्वकरणयोश्च षट्। तदनिवृत्तिकरणयोः षट्पंच। सूक्ष्मसाम्परायायोः पंच। उपशान्तक्षीणकषाययोश्चत्वारि। सयोगे त्रीणि। अयोगे द्वे। सिद्धे शून्यं ॥८४९॥

गुणकारा मिथ्यादृष्टौ द्वादश। सासादनादिद्वये अष्टावष्टौ। असंयते षड्विंशतिः। देशसंयतादित्रये द्वात्रिंशत्। क्षपकापूर्वकरणादित्रये चतुर्विंशतिः। तत उपशमकचतुष्के चत्वारिंशत्। क्षीणकषाये चतुर्विंशतिः। सयोगायोगयोर्द्वादश। सिद्धे शून्यं ॥८५०॥ २०

मिथ्यादृष्टिमें आठ, सासादन आदि तीनमें सात, देशसंयत आदि तीनमें और क्षपक व उपशमक अपूर्वकरणमें छह, अनिवृत्तिकरणमें छह और पाँच, सूक्ष्मसाम्परायमें पाँच, उपशान्तकषाय और क्षीणकषायमें चार, सयोगीमें तीन और अयोगीमें दो गुण्यका प्रमाण है। सिद्धोंमें गुण्य नहीं है ॥८४९॥ २५

मिथ्यादृष्टिमें बारह, सासादन आदि दोमें आठ-आठ, असंयतमें छब्बीस, देशसंयत आदि तीनमें बाईस, क्षपक अपूर्वकरण आदि तीनमें चौबीस, उपशमश्रेणीके चार गुणस्थानोंमें चालीस-चालीस, क्षीणकषायमें चौबीस, सयोगी और अयोगीमें बारह गुणकार हैं। सिद्धोंमें गुणकार नहीं हैं ॥८५०॥ ३०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षेपंगळु मिथ्यादृष्टियोळु पविनाल्कु। सासादनमिश्ररुगळोळु प्रत्येकं पत्तु असंयतनोळु अष्टाविंशति देशसंयतप्रमत्ताप्रमत्तरुगळोळु प्रत्येकं मूवत्तनाल्कु। अपूर्व्वकरणादि क्षपकत्रयदोळु प्रत्येकं षड्विंशतियुं उपशमकचतुष्टयदोळु प्रत्येकं नाल्वत्तेरडुगळुं क्षीणकषायनोळु षड्विंशतियुं सयोगरोळु द्वादशमुमयोगिगळोळु द्वादशमुं सिद्धरोळु नवंगळुमप्पुवु ॥

एक्कारं दसगुणियं दुसु छावट्ठि दसाहियं विसयं ।
तिसु छव्वीसं विसयं वेदुवसःमोत्ति दुसयबासीदी ॥८५२॥

एकादशदशगुणिताः द्वयो षट्षष्टिर्दशाधिकं द्विशतं । त्रिषु षड्विंशतिर्द्विशतं वेदकोपशमकपर्य्यंतं द्विशतद्वयशीतिः ॥

मिथ्यादृष्टियोळु नूरपत्तु भंगंगळप्पुवु। सासादननोळं मिश्रनोळं प्रत्येकमरुवत्तारुगळप्पुवु। असंयतनोळु दशाधिकद्विशतभंगंगळप्पुवु। देशसंयतप्रमत्ताप्रमत्तरुगळोळु प्रत्येकं इन्नूरिप्पत्तारुगळप्पुवु। उपशमकापूर्व्वकरण सवेदानिवृत्तिकरणरोळु प्रत्येकं मिन्नूरेभत्तेरडप्पुवु ॥

बादालं बिण्णिसया तत्तो सुहुमोत्ति दुसय दोसहियं ।
उवसंतम्मि य भंगा खवगेसु जहाकमं वोच्छं ॥८५३॥

द्विचत्वारिंशद्द्विशतं ततः सूक्ष्मपर्य्यंतं द्विशतं द्विशतसहितं उपशांते च भंगाः क्षपकेषु यथाक्रमं वक्ष्यामि ॥

ततः आ सवेदानिवृत्त्युपशमकनिवं मेले अवेदानिवृत्त्युपशमकनोळं सूक्ष्मसांपरायोपशमकनोळं प्रत्येकं द्विचत्वारिंशद्द्विशतभंगंगळप्पुवु। उपशांतकषायनोळु द्व्युत्तरद्विशत भंगंगळप्पुवु। क्षपकरोळु यथाक्रमविदं पेळ्दपेवें दु पेळदपं :—

क्षेपा मिथ्यादृष्टौ चतुर्दश । सासादनमिश्रयोर्दश । असंयतेऽष्टाविंशतिः । देशसंयतादित्रये चतुस्त्रिंशत् । क्षपकापूर्वकरणादित्रये षड्विंशतिः उपशमकचतुष्के द्वाचत्वारिंशत् । क्षीणकषाये षड्विंशतिः । सयोगायोगयोर्द्वादश । सिद्धे नव भवन्ति ॥८५१॥

भंगा मिथ्यादृष्टौ दशाग्रशतं । सासादनमिश्रयोः षट्षष्टिः । असंयते दशाग्रद्विशती । देशसंयतादित्रये षड्विंशत्यग्रद्विशती । उपशमकापूर्वसवेदानिवृत्तिकरणयोर्द्व्यशीत्यग्रद्विशती ॥८५२॥

तत उपर्युपशमकावेदानिवृत्तिकरणसूक्ष्मसाम्परायोः द्विचत्वारिंशदग्रद्विशती । उपशांतकषाये

मिथ्यादृष्टिमें चौदह, सासादन और मिश्रमें दस, असंयतमें अट्ठाईस, देशसंयत आदि तीनमें चौंतीस, क्षपकश्रेणीके अपूर्वकरण आदि तीनमें छब्बीस, उपशमश्रेणीके चार गुणस्थानोंमें बयालीस, क्षीणकषायमें छब्बीस, सयोगी और अयोगीमें बारह तथा सिद्धोंमें नौ क्षेप होते हैं ॥८५१॥

अब भंगोंकी संख्या कहते हैं—मिथ्यादृष्टिमें एक सौ दस, सासादन और मिश्रमें छियासठ, असंयतमें दो सौ दस, देशसंयत आदि तीनमें दो सौ छब्बीस, उपशमक अपूर्वकरण और वेदसहित अनिवृत्तिकरणमें दो सौ बयासी भंग होते हैं ॥८५२॥

उससे ऊपर उपशमक वेदरहित अनिवृत्तिकरण और सूक्ष्मसाम्परायमें दो सौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्तरसं दसगुणिदं वेदित्ति सयाहियं तु छादालं ।
सुहुमोत्ति खीणमोहे बावीससयं हवे भंगा ॥८५४॥

सप्तदश दशगुणिताः सवेदानिवृत्तिपर्य्यंतं शताधिकं तु षट्चत्वारिंशत् सूक्ष्मसांपराय-पर्य्यंतं क्षीणमोहे द्वाविंशतिशतं भवेद्भंगाः ॥

अपूर्व्वकरणक्षपकनोळं सवेदानिवृत्तिकरणक्षपक नोळं प्रत्येकं नूरेप्पत्तु भंगंगळप्पुवु । अवेदानिवृत्तियोळं सूक्ष्मसांपरायक्षपकनोळं प्रत्येकं नूरनाल्वत्तारु भंगंगळप्पुवु । क्षीणकषायनोळु नूरिप्पत्तेरडु भंगंगळप्पुवु ॥

अडदालं छत्तीसं जिणेसु सिद्धेसु होंति णव भंगा ।
एत्तो सव्वपदं पडि मिच्छादिसु सुणुह वोच्छामि ॥८५५॥

अष्टचत्वारिंशत् षट्त्रिंशत् जिनयोः सिद्धेषु भवंति नवभंगाः । इतः सर्व्वपदं प्रति मिथ्या-दृष्ट्यादिषु शृणुत वक्ष्यामि ॥

सयोगजिनरोळष्टाचत्वारिंशद्भंगंगळप्पुवु । अयोगिजिनरोळु षट्त्रिंशद् भंगंगळप्पुवु । सिद्धपरमेष्ठिगळोळु नवभंगंगळप्पुवु । इल्लिदं मेले सर्व्वपदंगळं कुरुत्तु मिथ्यादृष्ट्यादि गुणस्था-नंगळोळु पेळ्दपें केळि भव्यरुगळिरा ॥

अनंतरं सर्व्वपदंगळं पेळ्वल्लि पिंडपदंगळोळेकेकपदंगळेकसमयदोळु संभविसुववेंदु पेळ्दपरु :—

भव्विदराणण्णदरं गदीण लिंगाण कोहपहुडीणं ।
इगिसमये लेस्साणं सम्मत्ताणं च णियमेण ॥८५६॥

भव्येतरयोरन्यतरत्पदं गतीनां लिंगानां क्रोधप्रभृतीनां एकसमये लेश्यानां सम्यक्त्वानां च नियमेन ॥

द्वयग्रद्विशती । क्षपकेषु यथाक्रमं वक्ष्ये ॥८५३॥

अपूर्वसवेदानिवृत्तिकरणयोः सप्तत्यग्रशतं । अवेदानिवृत्तिसूक्ष्मसाम्परायथोः षट्चत्वारिंशदग्रशतं । क्षीणकषाये द्वाविंशत्यग्रशतं ॥८५४॥

सयोगेऽष्टचत्वारिंशत्, अयोगे षट्त्रिंशत्, सिद्धे नव भवति । इतः उपरि सर्वपदान्याश्रित्य मिथ्या-दृष्ट्यादिषु वक्ष्ये शृणुत ॥८५५॥

बयालीस, उपशान्तकषायमें दो सौ दो भंग होते हैं। आगे क्षपकमें क्रमानुसार कहते हैं ॥८५३॥

अपूर्वकरण और सवेद अनिवृत्तिकरणमें एक सौ सत्तर, वेदरहित अनिवृत्तिकरण और सूक्ष्मसाम्परायमें एक सौ छियालीस, क्षीणकषायमें एक सौ बाईस भंग हैं ॥८५४॥

सयोगीमें अड़तालीस, अयोगीमें छत्तीस और सिद्धोंमें नौ भंग होते हैं। यहाँसे आगे पदोंका आश्रय लेकर मिथ्यादृष्टी आदिमें भंग कहता हूँ तुम सुनो ॥८५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्व्वपदभंगंगळंतप्पल्लि पिंडपदंगळु प्रत्येकपदंगळुमेंदितेरनप्पुववेकसमयदोळु भव्या भव्यद्विकदोळन्यतरत्पदमुमंते गतिगळोळोंदु लिंगंगळोंदोंदुं क्रोधादिकषायंगळोळोंदोंदुं लेश्याषट्कदोळोंदोंदुं सम्यक्त्वंगळोळोंदोंदुं मिथ्यादृष्टचादि चतुर्द्दशगुणस्थानंगळोळु यथायोग्यंगळागि नियमदिदं युगपत्संभविसुववु ॥

अनंतरं मिथ्यादृष्टियोळु प्रत्येकपदंगळं संभवंगळं पेळ्दपरु :—

पत्तेयपदा मिच्छे पण्णरसा पंच चेव उवजोगा ।
दाणादी ओदयिये चत्तारि य जीवभावो य ॥८५७॥

प्रत्येकपदानि मिथ्यादृष्टौ पंचदश पंच चैवोपयोगाः । दानादयः औदयिके चत्वारि च जीवभावश्च ॥

मिथ्यादृष्टियोळु पंचदश प्रमितंगळु प्रत्येकपदंगळप्पुववावुवेंदोडे कुमतिकुश्रुतविभंगमेंबज्ञानंगळुं चक्षुरचक्षुर्द्दर्शनद्वयमुमेंदी युपयोगपंचकमुं दानलाभभोगोपभोग वीर्य्यंगळेंबी दानादिपंचकमुं मिथ्यादर्शनमुमज्ञानमुमसंयममुमसिद्धत्वमुमेंबौदयिकभावदोळु नाल्कुं जीवत्वमुमेंदितु प्रत्येकपदंगळु पदिनय्दप्पुवु । १५ ॥

पिंडपदा पंचेव य भव्विदरदुगं गदी य लिंगं च ।
कोहादी लेस्सावि य इदि वीसपदा हु उड्ढेण ॥८५८॥

पिंडपदानि पंचैव भव्येतरद्विकं गतिश्च लिंगं च । क्रोधादयो लेश्या अपि च इति विंशतिपदानि खलूर्ध्वेन ॥

तानि तु सर्वपदानि पिंडप्रत्येकभेदाद्द्विविधानि । तत्र पिंडपदेषु एकसमये भव्याभव्ययोः गतिषु लिंगेषु क्रोधादिषु लेश्यासु सम्यक्त्वेषु चैकैकमेव गुणस्थानेषु यथायोग्यं नियमेन युगपत् सम्भवति ॥८५६॥

युगपत्संभवानि प्रत्येकपदानि मिथ्यादृष्टौ पंचदशैव । तानि कानि ? अज्ञानाद्यद्विदर्शनान्येवं पंचोपयोगा दानादयः पंच औदयिके मिथ्यात्वाज्ञानासंयमासिद्धत्वानि चत्वारि जीवत्वं चेति ॥८५७॥

वे सर्वपद दो प्रकारके हैं—पिण्डपद और प्रत्येकपद। जिस भाव समूहमें-से एक समयमें एक जीवके एक-एक ही होता है सब नहीं होते उस भाव समूहको पिण्डपद कहते हैं। जैसे चारों गतियोंमें-से एक जीवके एक कालमें एक गति ही होती है, चारों नहीं होती। अतः गति पिण्डपद है। और जो भाव एक जीवके एक कालमें एक साथ भी होते हैं उनको प्रत्येकपद कहते हैं। सो भव्य, अभव्य, गति, लिंग, क्रोधादि चार, लेश्या और सम्यक्त्व ये पिण्डपद हैं। क्योंकि इनमें-से एक समयमें एक जीवके गुणस्थानोंमें यथायोग्य एक-एक ही नियमसे युगपद् होता है ॥८५६॥

एक साथ सम्भव प्रत्येकपद मिथ्यादृष्टिमें पन्द्रह होते हैं, वे इस प्रकार हैं—तीन अज्ञान, दो दर्शन, ये पाँच उपयोग, दान आदि पाँच लब्धियाँ, औदयिकमें-से मिथ्यात्व, अज्ञान, असंयम, असिद्धत्व ये चार और जीवत्व पारिणामिक ॥८५७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यिल्लि युगपत्संभविगळं प्रत्येकपदंगळें बुदु सहानवस्थायिगळं पिंडपदंगळें बुदु। अल्लि पूर्वोक्त पंचदश प्रत्येकपदंगळिंदं मेले मेले भव्याभव्यद्विकमुं गतियुं लिंगमुं क्रोधादियुं लेश्येगळुमें बी विंशति पदंगळु मिथ्यादृष्टियोळु मेले मेलेयप्पुवु ॥

पत्तेयाणं उवरिं भव्विदरदुगस्स होदि गदिलिंगे ।
कोहादिलेस्ससम्मत्ताणं रयणा तिरिच्छेण ॥८५९॥

प्रत्येकानामुपरि भव्येतरद्विकस्य भवति गतिलिंगक्रोधादिलेश्या सम्यक्त्वानां रचना तिर्य्यग्रूपेण ॥

प्रत्येकपदंगळु पदिनय्दर मेले तिर्य्यग्रूपदिंदं भव्याभव्यद्वयमक्कुं। गतिलिंगक्रोधादि कषाय-लेश्या सम्यक्त्वंगळगे रचनेगळु तिर्य्यग्रूपदिंदमेयक्कुं। संदृष्टि मिथ्यादृष्टिग—

कु	कु	वि	च	अ	दा	ला	भो	उ	वी	मि	अ	अ	अ	जी	भ	न	स्त्री	क्रो	कृ
															अ	ति	पु	मा	नी
															म	न	माया	क	
															दे		लो	पो	
																		प	
																		शु	

तदुपरि पिंडादानि पंचैव । तानि तु भव्येतरद्वयं गतिः लिंगं क्रोधादिः लेश्या चेति । इत्येतानि विंशतिपदानि खलु मिथ्यादृष्टावूर्ध्वरूपेण स्थाप्यानि ॥८५८॥

सर्वत्र प्रत्येकपदानामुपरिस्थितानां भव्याभव्ययोः गतीनां लिंगानां क्रोधादिकषायाणां लेश्यानां सम्यक्त्वानां च रचना तिर्यग्रूपेण कार्या भवन्ति ॥८५९॥

उन पन्द्रह प्रत्येक पदोंके ऊपर मिथ्यादृष्टिमें पिण्डपद पाँच ही हैं, भव्य-अभव्य दोनों, गति, लिंग, क्रोधादि और लेश्या। ये बीस पद मिथ्यादृष्टिमें ऊपर-ऊपर स्थापित करो ॥८५८॥

सर्वत्र प्रत्येक पदोंके ऊपर स्थापित भव्य, अभव्य, गति, लिंग, क्रोधादि कषाय, लेश्या और सम्यक्त्वकी रचना तिर्यग् रूपसे बराबरमें करना चाहिए ॥८५९॥

विशेषार्थ—नीचे तो प्रत्येक पद ऊपर लिखना चाहिए। उनके ऊपर मूल पिण्डपद ऊपर-ऊपर लिखना चाहिए।

कु । कु । वि । च । अ । दा । ला । भो । उ । वी । मि । अ । अ । अ । जी ।

भ	न	स्त्री	क्रो	कृ
अ	ति	पु.	मा	नी
म	न.	मा.	क	
दे	०	लो	ते	
			प	
			शु.	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एक्कादी दुगुणकमा एक्केक्कं रुंधियूण हेट्ठम्मि ।
पदसंजोगे भंगा गच्छं पडि होंति उवरुवरिं ॥८६०॥

एकादयो द्विगुणक्रमादेकैकमवलंब्याऽधः पदसंयोगे भंगाः गच्छं प्रति भवंत्युपर्युपरि ॥ एकमादियागि द्विगुणद्विगुण क्रमदिदमेकैकपदंगळमवलंबिसियधस्तनपदसंयोगदोळु गच्छं प्रति मेले मेले भंगंगळप्पुवु । अदें तेंदोडे कुमतिज्ञानमोंदु यिल्लि प्रत्येकभंगमो देयक्कुं १ ॥

कुश्रुतदोळु प्रत्येकभंगमोंदुं १ । तदधस्तन कुमतिज्ञानदोडने संयोगमागुत्तं विरलु द्विसंयोगभंग १ कूगि भंगमेरडु २ । विभंगज्ञानदोळु प्रत्येक भंगमोंदु १ । तदधस्तन कुश्रुतादिगळोडने द्विसंयोगभंगमेरडु । २ । त्रिसंयोगभंगमोंदु । १ । कूडि भंगंगळु नाल्कु ४ । चक्षुर्दर्शनदोळु प्रत्येकभंगमोंदु । १ । तदधस्तनविभंगज्ञानादिगळोडने द्विसंयोगभंगंगळु मूरु ३ । त्रिसंयोगभंगंगळु मूरु ३ । चतुःसंयोगमोंदु १ कूडि भंगमेंदु ८ । अचक्षुर्दर्शनदोळु प्रत्येकभंगमोंदु १ । तदधस्तनचक्षुर्दर्शनादिगलोडने द्विसंयोगभंगंगळु नाल्कु ४ । त्रिसंयोगभंगंगळारु ६ । चतुःसंयोगभंगंगळु नाल्कु । ४ । पंचसंयोग भंगमोंदु १ । कूडि भंगंगळु पदिनारु १६ । दानलब्धियोळु

एकमादिं कृत्वा द्विगुणद्विगुणक्रमाः एकैकपदमवलंब्याधस्तनपदसंयोगे गच्छं प्रत्युपर्युपरि भंगा भवन्ति । तद्यथा—

कुमतौ प्रत्येकभंग एकः । कुश्रुते प्रत्येकभंग एकः । तदधस्तनेन संयोगे द्विसंयोगेऽप्येकः मिलित्वा द्वौ । विभंगे प्रत्येकभंग एकः । तदधस्तनकुश्रुतादिना द्विसंयोगौ द्वौ । त्रिसंयोग एकः, मिलित्वा चत्वारः । चक्षुर्दर्शने प्रत्येकभंग एकः । तदधस्तनविभंगादिना द्विसंयोगास्त्रयः । त्रिसंयोगास्त्रयः । चतुःसंयोग एकः । मिलित्वाष्टौ । अचक्षुर्दर्शने प्रत्येकभंग एकः । तदधस्तनचक्षुरादिना द्विसंयोगाश्चत्वारः । त्रिसंयोगाः षट् । चतुःसंयोगाश्चत्वारः ।

एकसे लगाकर क्रमसे दूने-दूने एक-एक पदका अवलम्ब लेकर नीचे-नीचेके पदोंके संयोगसे जितनेवाँ पद हो उसके ऊपर-ऊपर भंग होते हैं । वही कहते हैं—

मिथ्यादृष्टि गुणस्थानमें प्रत्येक पद सबमें नीचे कुमतिज्ञानका स्थापन किया । उसका प्रत्येक भंग एक ही है । उसके ऊपर कुश्रुत स्थापित किया । उसका प्रत्येक भंग एक और उसके नीचे स्थापित कुमतिके संयोगसे दो संयोगी भंग एक । इस प्रकार दो भंग हुए । उसके ऊपर विभंगको स्थापित किया । उसका प्रत्येक भंग एक और उसके नीचे स्थापित कुश्रुत और कुमतिके संयोगसे दो संयोगी भंग दो । तथा तीनोंके संयोगसे तीन संयोगी भंग एक । इस प्रकार चार भंग हुए । उसके ऊपर चक्षुदर्शन । उसका प्रत्येक भंग एक और उसके नीचे स्थापित विभंग कुश्रुत कुमतिके संयोगसे दो संयोगी भंग तीन । और चक्षु कुमति कुश्रुत अथवा चक्षु कुमति विभंग या चक्षु कुश्रुत विभंगके संयोगसे तीन संयोगी भंग तीन । चारोंके संयोगसे चार संयोगी भंग एक । ऐसे आठ हुए । उसके ऊपर अचक्षुदर्शन । उसमें प्रत्येक भंग एक । उसके नीचे चक्षुदर्शन, विभंग, कुश्रुत, कुमतिका संयोग क्रमसे होनेपर दो संयोगी भंग चार । तथा अचक्षु चक्षु कुमति, या अचक्षु चक्षु कुश्रुत, या अचक्षु चक्षु विभंग या अचक्षु कुमति कुश्रुत, या अचक्षु कुमति विभंग या अचक्षु कुश्रुत विभंगके संयोगसे तीन संयोगी भंग छह । तथा अचक्षु चक्षु कुमति कुश्रुत या अचक्षु चक्षु कुमति विभंग या अचक्षु चक्षु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्येकभंगमो दु १। तदधस्तन चक्षुर्दर्शनादिगळोडने द्विसंयोगभंगंगळम्बु ५। त्रिसंयोगंगळ् पत्तु १०। चतुःसंयोगंगळु पत्तु १०। पंचसंयोगंगळय्दु ५। षट्संयोगमो दु १। कूडि भंगंगळ् ३२। इंतु पदंपदं प्रति द्विगुणद्विगुण भंगंगळागुत्तं पोगि प्रत्येकपदंगळ पदिनैवनेय जीवपददोळु प्रत्येक भंगमो दु १। पंचदशसंयोग भंगमुमो दु १। द्विसंयोगंगळ् चतुर्दशसंयोगंगळ् प्रत्येकं पदिनाल्कु १४।१४। त्रिसंयोगभंगंगळ् त्रयोदशसंयोगभंगंगळ् प्रत्येकं द्विरूपोनगच्छेय एकबार संकलन- ५
मात्रंगळप्पुवु। | १३ | १४ | लब्ध ९१। ९१। चतुसंयोगभंगंगळ् द्वादश संयोग भंगंगळ्
| २ | १ |
प्रत्येकं त्रिरूपोनगच्छेय द्विकवारसंकलन मात्रंगळप्पुवु।
| १२|१३|१४ | लब्ध ३६४।३६४। पंचसंयोग भंगंगळ् एकादशसंयोगभंगंगळ् प्रत्येकं चतूरूपोन-
| ३ | २ | १ |
गच्छेय त्रिवार संकलनमात्रंगळप्पुवु | ११|१२|१३|१४ | लब्ध १००१। १००१।
| ४ | ३ | २ | १ |
षट्संयोभंगंगळ् दश- १०

पंचसंयोग एकः। मिलित्वा षोडश। दानलब्धौ प्रत्येकभंग एकः। तदधस्तनाचक्षुरादिना द्विसंयोगाः पंच। त्रिसंयोगा दश। चतुःसंयोगा दश। पंचसंयोगाः पंच। षट्संयोग एकः। मिलित्वा द्वात्रिंशत्। एवं प्रतिपदं द्विगुणा भूत्वा पंचदशे जीवपदे प्रत्येकभंगः पंचदशसंयोगश्चैकः। द्विसंयोगाश्चतुर्दशसंयोगाश्च चतुर्दश। त्रिसंयोगाः त्रयोदशसंयोगाश्च द्विरूपोनगच्छस्यैकवारसंकलनमात्राः १३। १४। लब्धं ९१। ९१। चतुस्संयोगा
२ १
द्वादशसंयोगाश्च त्रिरूपोनगच्छस्य द्विकवारसंकलनमात्राः १२। १३। १४। लब्धं ३६४। ३६४। १५
३ । २ । १

कुश्रुत विभंग, या अचक्षु कुमति कुश्रुत त्रिभंगके संयोगसे चार संयोगी भंग चार। तथा अचक्षु चक्षु विभंग कुश्रुत कुमति इन पाँचोंके संयोगसे पंचसंयोगी भंग एक। ये मिलकर सोलह हुए। इसी प्रकार उसके ऊपर दान लब्धि रखो। उसका प्रत्येक भंग एक। और उसके नीचे चक्षुदर्शन आदि हैं। उनके संयोगसे दो संयोगी भंग पाँच। तीन संयोगी दस, चार संयोगी दस, पाँच संयोगी पाँच, छह संयोगी एक मिलकर बत्तीस हुए। इसी प्रकार ऊपर- २०
ऊपर एक-एक पदको रखकर उनके भंग दूने-दूने होते हैं। उनमें प्रत्येक संयोगी भंग तो एक होता है। और दो संयोगी आदि भंग नीचेके भावोंके संयोगके बदलनेसे जितने-जितने हों उतने-उतने जानना। सो लाभ लब्धिमें चौंसठ, भोग लब्धिमें एक सौ अट्ठाईस, उपभोगमें दो सौ छप्पन, वीर्यमें पाँच सौ बारह, मिथ्यात्वमें एक हजार चौबीस, अज्ञानमें दो हजार अड़तालीस, असंयममें चार हजार छियानवे। असिद्धत्वमें इक्यासी सौ बानवे, जीवत्वमें २५
सोलह हजार तीन सौ चौरासी भंग होते हैं। पन्द्रहवें जीवपदमें इतने भंग कैसे होते हैं यह स्पष्ट करते हैं—

प्रत्येक भंग एक। दो संयोगी और चौदह संयोगी चौदह-चौदह। तीन संयोगी और तेरह संयोगी भंग दो हीन गच्छ प्रमाणका एक बार जोड़ मात्र हैं। गच्छका प्रमाण पन्द्रह है। दो कम करनेसे तेरह रहे। एकसे तेरह तकका जोड़ इक्यानवे होता है सो इक्यानवे ३०
इक्यानवे भंग हैं। इसी तरह चार संयोगी और बारह संयोगी भंग तीन हीन गच्छका दो बार जोड़-मात्र हैं। सो तीन सौ चौंसठ तीन सौ चौंसठ भंग होते हैं। पाँच संयोगी और ग्यारह संयोगी भंग चार हीन गच्छका तीन बार जोड़मात्र होनेसे एक हजार एक, एक

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयोगभंगंगळ पंच रूपोनगच्छेय चतुर्वार संकलन मात्रंगळप्पुवु

१०	११	१२	१३	१४
५	४	३	२	१

लब्धं २००२ । २००२ । सप्तसंयोग भंगंगळु नवसंयोग भंगंगळु षड्रूपोनगच्छेय पंचवार संकलन मात्रंगळप्पुवु ।

९	१०	११	१२	१३	१४
६	५	४	३	२	१

लब्धं ३००३ । ३००३ । अष्टसंयोग भंगंगळु सप्तरूपोन गच्छेय षड्वारसंकलनमात्रंगळप्पुवु

८	९	१०	११	१२	१३	१४
७	६	५	४	३	२	१

लब्ध ३४३२ । कूडि प्रत्येक पदंगळोळु पविनय्वनेय जीवभावदोळु पविनारु सासिरव मूनूरेण्भत्तनाल्कु भंगंगलप्पुवु १६३८४ ।

पंचसंयोगा एकादशसंयोगाश्च चतूरूपोनगच्छस्य त्रिकवारसंकलनमात्राः ११ । १२ । १३ । १४ लब्धं
४ । ३ । २ । १

१००१ । १००१ । षट्संयोगा दशसंयोगाश्च पंचरूपोनगच्छस्य चतुर्वारसंकलनमात्राः १० । ११ । १२ ।
५ । ४ । ३ ।

१३ । १४ लब्धं २००२ । २००२ । सप्तसंयोगा नवसंयोगाश्च षड्रूपोनगच्छस्य पंचवारसंकलनमात्राः—
२ । १

९ । १० । ११ । १२ । १३ । १४ लब्धं ३००३ । ३००३ । अष्टसंयोगाः सप्तरूपोनगच्छस्य षड्वारसंकलन-
६ । ५ । ४ । ३ । २ । १

मात्राः ८ । ९ । १० । ११ । १२ । १३ । १४ लब्धं ३४३२ । मिलित्वा तत्र षोडशसहस्रत्रिशतचतुरशीति-
७ । ६ । ५ । ४ । ३ । २ । १

हजार एक हैं। छह संयोगी और दस संयोगी भंग पाँच हीन गच्छका चार बार जोड़मात्र होनेसे दो हजार दो, दो हजार दो हैं। सात संयोगी और नौ संयोगी भंग छह हीन गच्छका पाँच बार जोड़मात्र हैं अतः तीन हजार तीन, तीन हजार तीन हैं। आठ संयोगी भंग सात हीन गच्छका छह बार जोड़मात्र हैं अतः चौंतीस सौ बत्तीस हैं। ये सब मिलकर पन्द्रहवें जीवपदके सोलह हजार तीन सौ चौरासी भंग होते हैं। यह पण्णट्ठीका चौथा भाग है क्योंकि पैंसठ हजार पाँच सौ छत्तीसको पण्णट्ठी कहते हैं।

विशेषार्थ—यहाँ जीवपद पन्द्रहवाँ होनेसे गच्छका प्रमाण पन्द्रह है। दो हीन गच्छका एक बार जोड़ करनेके लिए पूर्वोक्त सूत्रके अनुसार तेरह, चौदहको परस्परमें गुणा करे। फिर दो और एकको परस्परमें गुणा करके उसका भाग देनेपर इक्यानवे होते हैं। तीन हीन गच्छका दो बार जोड़ करनेके लिए बारह, तेरह, चौदहको परस्परमें गुणा करके, फिर तीन, दो, एकको परस्परमें गुणा करके उससे भाग देनेपर तीन सौ चौंसठ होते हैं। चार हीन गच्छका तीन बार जोड़ करनेके लिए ग्यारह, बारह, तेरह, चौदहको परस्परमें गुणा करके और उसमें चार, तीन, दो, एकको परस्परमें गुणा करके उससे भाग देनेपर एक हजार एक होते हैं। पाँच बार गच्छका चार बार जोड़नेके लिए दस, ग्यारह, बारह, तेरह, चौदहको परस्परमें गुणा करके उसमें पाँच, चार, तीन, दो, एकको परस्परमें गुणा करके उससे भाग देनेपर दो हजार दो होते हैं। छह हीन गच्छका पाँच बार जोड़ करनेके लिए नौ, दस, ग्यारह, बारह, तेरह, चौदहको परस्परमें गुणा करके उसमें छह, पाँच, चार, तीन, दो, एकको परस्परमें गुणा करके उससे भाग देनेपर तीन हजार तीन होते हैं। सात हीन गच्छका

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इवु पण्णत्तिय चतुर्त्थांशमक्कुं ६५ = १ संदृष्टि :—
४

जी	१	१४	९१	३६४	१००१	२००२	३००३	३४३२	३००३	२००२	१००१	३६४	९१	१४	१
०															
०															
१५															
दा	१	५	१०	१०	५	१	३२								
अ	१	४	६	४	१	१६									
च	१	३	३	१	८										
वि	१	२	१	४											
कु	१	१	२												
कुं	१	१													

इल्लि गुणयोगीयप्प संकलनसूत्रमं पेळ्दपरु—

इट्ठपदे रूऊणे दुगसंवग्गम्मि होदि इट्ठधणं ।
असरिच्छाणंतधणं दुगुणेगूणे सगीयसव्वधणं ॥८६१॥

इष्टपदे रूपोने द्विकसंवर्गे भवतीष्टधनं । असदृशानामंतधनं द्विगुणैकोने स्वकीयसर्वधनं ॥ ५

इल्लि यिष्टपदं विवक्षितपदं जीवभावं पदिनय्दनेयदादोडा पदसंख्येयोळोंदुरूपं कुंदिसि १५–१ । शेषमं पदिनाल्कं १४ । विरळिसि प्रतिरूपं द्विकमनित्तु संवर्गं माडल्पडुत्तिरलु बंद लब्धमिष्टधनं पदिनारुसासिरद मूनूरेण्भत्तनाल्वप्पुदु । १६३८४ । पण्णट्ठिय चतुर्त्थांशमक्कुमें बुदर्त्थमा असदृशानामंतनं ई प्रत्येकपदंगळोळ्पुट्टिद अवसानधनमना पण्णट्ठिय चतुर्त्थांशमं अंतधणं गुणगुणितं आदिविहीणं रूऊणुत्तरभजितमें बितु द्विगुणिसियोंदु रूपं कळेयुत्तं विरलु स्वकीयेष्टस्थानदोळ् सव्वंधनमक्कुं संदृष्टि $\boxed{\frac{६५=१}{४}}$ २ । ऋण $\overset{०}{१}$ इदनपवर्तिसिदोडे संदृष्टि $\boxed{\frac{६५=१}{२}}$ ऋण $\overset{०}{१}$ १०

भंगाः १६३८४ । इदं पंण्णट्ठिचतुर्थांशः ६५ = १ ॥८६०॥ अथोत्तरत्रयभंगसंकलनसूत्रमाह —
४

१—

इष्टपदं विवक्षितभावः जीवत्वं तदा पंचदशसु रूपे ऊने १५ । शे १४ मात्रद्विकसंवर्गे कृते इष्टधनं स्यात्

छह बार जोड़ लानेके लिए आठ, नौ, दस, ग्यारह, बारह, तेरह, चौदहको परस्परमें गुणा करके उसमें सात, छह, पाँच, चार, तीन, दो, एकको परस्परमें गुणा करके उससे भाग देने- १५
पर चौंतीस सौ बत्तीस होते हैं ॥८६०॥

आगे भंगोंको मिलानेके लिए सूत्र कहते हैं—

विवक्षित पदकी संख्या जितनी हो उसमें एक घटानेपर जितना रहे उतने दोके अंक रखकर परस्परमें गुणा करनेपर विवक्षितपदके भंगोंके प्रमाणरूप इष्ट धन होता है । जैसे जीवपदकी संख्या पन्द्रह है । उसमें एक घटानेपर चौदह रहे । सो चौदह जगह दोके अंक २०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

